## महाकुलादञ्खञौ । (१४१/११६४)

अन्यतरस्यामिति अनुवर्तते । महाकुलशब्दात् अञ्खञौ प्रत्ययौ भवतः । [1]पक्षे खः । माहाकुलः, माहाकुलीनः, महाकुलीनः ॥

## दुष्कुलाड् ढक् । (१४२/११६५)

दुष्कुलशब्दात् अपत्ये ढक् प्रत्ययो भवति । अन्यतरस्यामि[2]त्यनुवृत्तेः खश्च । दौष्कुलेयः, दुष्कुलीनः ॥

## स्वसुश्छः । (१४३/११६६)

स्वसृशब्दादपत्ये छः प्रत्ययो भवति । [3]अणोऽपवादः । स्वसुरपत्यं स्वस्रीयः ॥

## भ्रातुर्व्यच्च । (१४४/११६७)

भ्रातृशब्दादपत्ये व्यत् प्रत्ययो भवति । चकाराच् छश्च[4] । अणोऽपवादः । भ्रातृव्यः, भ्रात्रीयः । तकारः स्वरार्थः ॥

## व्यन् सपत्ने । (१४५/११६८)

सपत्नशब्दः शत्रुपर्यायः शब्दान्तरव्युत्पन्नमेव । सपत्नीशब्दादपरेऽकारम् इवार्थे [5]निपातयन्ति । सपत्नीव सपत्नः । भ्रातृशब्दाद् व्यन् प्रत्ययो भवति समुदायेन चेदमित्रः सपत्न उच्यते । अपत्यार्थोऽत्र नास्त्येव । पाप्मना भ्रातृव्येण[6] । [7]भ्रातृव्यः कण्टकः ॥

## रेवत्यादिभ्यष्ठक् । (१४६/११६९)

रेवती इत्येवमादिभ्योऽपत्ये ठक् प्रत्ययो भवति । यथायोगं ढगादीनामपवादः । रैवतिकः । आश्वपालिकः ।

रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवञ्चिन् । वृकग्राह । कर्णग्राह । दण्डग्राह । कुक्कुटाक्ष ॥

## गोत्रस्त्रियाः कुत्सने ण च । (१४७/११७१)

अपत्यं पौत्रप्रभृति गोत्रं गृह्यते । गोत्रं या स्त्री तदभिधायिनः शब्दादपत्ये णः प्रत्ययो भवति, चकाराद् ठक् [8]च, कुत्सने गम्यमाने । पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा । गार्ग्याः अपत्यं गार्गः जाल्मः, गार्गिकः । ग्लुचुकायन्याः अपत्यं ग्लौचुकायनः, ग्लौचुकायनिकः । गोत्राद्यूनि इति यूनि प्रत्ययो भवति । [9]गोत्रम् इति किम् ? कारिकेयो जाल्मः । स्त्रियाः इति किम् ? औपगविर्जाल्मः । कुत्सने इति किम् ? गार्ग्यो माणवकः ॥

---

1. अन्यतरस्यांग्रहणानुवृत्तेः खंश्च ड.फ. 2. ग्रहणानुवृत्तेः फ. 3. अणोऽपवादः नास्ति फ. 4. च नास्ति फ. 5. वर्णयन्ति फ. 6. हतः इत्यधिकम् ब.क.फ. 7. उदाहरणमिदं नास्ति फ. 8. च नास्ति फ. 9. गोत्रग्रहणम् फ.